Vayunandan Mishra
Mulshanti-paddhati
मूलशान्ति-पद्धतिः
Samskrit
Printed on paper
N.A.
Folio: 1-32, 1-23
7"x5"
Complete

अथ मूलशान्ति-पद्धतिः

 श्रीयुत वायुनन्दन मिश्र प्रणीत ।

मूल्य ।)



श्रीकृष्णाय नमः ।

अथ मूलशान्ति पद्धतिः ।

श्रीगणेशायनमः ॥ अथमयूखानुसारी गोमुखप्रसव कारिका प्रारम्भः ॥ ततो गर्गः ॥ पूषाश्विनौ गुरौ सार्पे मघा चित्रेन्द्र मूलभे ॥ एषु ऋक्षेषु जातस्य कुर्याद्गोजननं तथा ॥ १ ॥ जन्मर्क्षे वा त्रिजन्मर्क्षे शुभवारे शुभेदिने ॥ कृत्वाऽभ्यङ्गादिकं सर्वं गृहालङ्कारपूर्वकम् ॥ २ ॥ गोमयेनोपलिप्याथ गृहमीशानभागके ॥ पङ्कजं कर्णिकायुक्तं रजोभिः श्वेतवर्णकैः ॥ ३ ॥ व्रीहींस्तत्र विनिक्षिप्य यथा वित्तानुसारतः ॥ नवशूर्पंतु तन्मध्ये रक्तवस्त्रं

प्रसारयेत् ॥ ४ ॥ स्थापयित्वा शिशुं तत्र पुनः सूत्रेण
वेष्टयेत् ॥ प्राङ्मुखं तमवाक्पादं तिलगर्भं गतं शिशुम् ॥५॥
गोमुखं दर्शयित्वाथ पुनर्जातं तु गोमुखात् ॥ विष्णुर्योनी-
ति मंत्रेण गव्येन स्नापयेच्छिशुम् ॥ ६ ॥ गवामङ्गेति
मंत्रेण गवामङ्गेषु संस्पृशेत् ॥ विष्णोःश्रेष्ठेन मंत्रेण गोप्रसूतं
तु बालकम् ॥ ७ ॥ आचार्यस्तु समादाय पश्चान्मात्रे ददे-
त्तथा ॥ माता जघन्य भागस्था शिशुमानीय तं मुखात् ॥८॥
ततः पित्रे तदा दद्यात्ततो मात्रे प्रदापयेत् ॥ वस्त्रे स्थाप्य पिताऽ
स्याथ पुत्रस्य मुखमीक्षयेत् ॥ ६ ॥ गोमूत्रं गोमयं क्षीरं
दधिसर्पिश्च संयुतम् ॥ आपोहिष्ठादिभिर्मंत्रैरभिषिञ्चेत्ततः
शिशुम् ॥ १० ॥ मूर्ध्नि चाघ्राय तत्पुत्रं तन्मंत्रेण तदा पिता ॥

अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे ॥ ११ ॥ आत्मावै
पुत्रनामासि संजीव शरदः शतम् ॥ मूर्द्धनि त्रिरवघ्राय तं
शिशुं स्थापयेत्ततः ॥ १२ ॥ पुण्याहं वाचयेत्पश्चाद्ब्राह्मणै-
र्वेदपारगैः ॥ दरिद्रायाथ विप्राय तां गामभ्यर्च्य दापयेत्
॥ १३ ॥ गोवस्त्र स्वर्ण धान्यानि दद्यादर्कादितः क्रमात् ॥
यथाशक्ति धनं दद्याद्ब्राह्मणेभ्यस्तदा पिता ॥ १४ ॥ ततो
होमं प्रकुर्वीत स्व स्वशाखोक्त मार्गतः ॥ उल्लेखनादिकं
कृत्वा चाज्यभागान्तमाचरेत् ॥ १५ ॥ होमस्यैशानदिग्भागे
धान्योपरि शुभं घटम् ॥ पंचगव्यं घटे स्थाप्य तिलांस्तत्र
विनिक्षिपेत् ॥ १६ ॥ क्षीरद्रुमकषायाश्च पञ्चरत्नानि
निक्षिपेत् ॥ वस्त्रयुग्मेन संच्छाद्य गंधादिभिरथार्चयेत् ॥ १७ ॥

विष्णुं वरुणमभ्यर्च्य प्रतिमांच विधानतः॥ यतइन्द्रादिभिर्मंत्रैः
कुम्भं स्पृष्ट्वाभिमंत्रयेत् ॥१८॥ दधिमध्वाज्य युक्तेन होमं कु-
र्याद्विधानतः । आपोहिष्ठेति तिसृभिरप्सुमेसोम इत्यथ ॥१६॥
तद्विष्णोः परमंपदमत्तीभ्यां तेथ सूक्ततः ॥ ऋग्भिराभिः
प्रत्यृचं वाष्टाविंशति संख्यया ॥ २० ॥ अशक्तश्चाष्टसंख्यं
वा दधिमध्वाज्य संयुतम् ॥ आदित्यादिग्रहाणांच होमंकुर्या-
त्समंत्रकम् ॥ २१ ॥

इति गोमुखप्रसवकारिका समाप्ता ।

श्रीगणेशायनमः अथ गोमुख प्रसवशांति प्रयोगः ॥

आचम्य प्राणानायम्य ॥ अपवित्रः पवित्रोवा सर्वाव-
स्थांगतोपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः

शुचिः ।। इत्यात्मानं पूजासामग्रीं च संप्रोक्ष्य ।। हस्ते अक्षत पुष्पाणि गृहीत्वा आनोभद्रादीन् सुमुखश्चैकदन्तश्चेत्यादि मंगलमंत्रान्पठेत् ।। संकल्पः ।। ओंतत्सद्द्यमासोत्तमे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रः अमुकशर्मा सपत्नीकोहं अस्य बालकस्य मूलादि) अमुकनक्षत्रोत्पत्ति-सूचितारिष्ट निरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं गोमुखप्रसवशांतिं करिष्ये ।। तदङ्गत्वेन स्वस्ति पुण्याहवाचनं मातृकापूजनं वसोर्द्धारापूजनं आयुष्यमंत्रजपं नान्दिश्राद्धं आचार्यादि वरणानि च करिष्ये ।। तत्रादौ निर्विघ्नतासिध्यर्थं गणेशाम्बिकयोः पूजनमहं करिष्ये ।। (केचिन्मते केवल गणेशपूजनमाचार्य-वरणं कुर्यात्) यथोपचारैः ग्रहशांत्यानुसारेण पूजनं कुर्यात्

(वरण संकल्पेविशेषः) वरणद्रव्यं गृहीत्वा अस्मिन् गोमुख
प्रसवशान्तिकर्मणि एभिर्वरणद्रव्यैः अमुकगोत्रममुकशर्माणं
ब्राह्मणमाचार्यत्वेन त्वामहं वृणे ॥ वृतोस्मि ॥ प्रार्थना ॥
आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं
मम यज्ञेस्मिनाचार्यो भव सुव्रत ॥ एवं ब्रह्मवरणमपि कुर्यात् ॥
ततः आचार्यः स्वेताष्टदलं विरच्य तस्योपरि यथाशक्ति
व्रीहीन्निक्षिप्य तस्योपरि वंशशूर्पं निधाय शूर्पे तिलान्दर्भाञ्च
विकीर्य तस्योपरि रक्तवस्त्रं प्रसार्य प्राङ्मुखं शिशुं निधाय
मांगलिकसूत्रेण शूर्पं वेष्टयित्वा शिशुसमीपे गोमुखमानीय
प्रसवं भावयित्वा मिलितेन पंचगव्येन विष्णुर्योनिमितिमंत्रेण
शिशुं स्नापयित्वा (तत्रमंत्रः) ॐविष्णुर्योनिं कल्पयतु

त्वष्टारूपाणि पिंशतु आशिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ इति ॥ गवामंगेषु इतिमंत्रेण सर्वाङ्गेषु स्पृशेत् ॥ तत्र-मंत्रः ॥ गवामंगेषु तिष्ठन्ति भुवनानि चतुर्दश ॥ यस्मात्त-स्माच्छिवं मेस्यादिहलोके परत्र च इति गां स्पृशेत् ॥ ततो विष्णोः श्रेष्ठेनेति मंत्रेण आचार्यः शिशुमादाय मात्रे दद्यात् ॥ तत्रमंत्रः ॥ ॐ विष्णोः श्रेष्ठेनरूपेणास्यां नार्यां गवीन्यां पुमांसं पुत्रानाधेहि दशमे मासि सूतवे ॥ ततो मातापित्रे दत्वा ॥ पिता अंगादंगादितिमंत्रेण शिशुं मूर्द्धिन त्रिरवघ्राय मात्रे दत्वा ॥ ॐ अङ्गादङ्गात्संभवसि हृदया-दभिजायते ॥ आत्मावैपुत्रनामासि सजीवशरदः शतम् ॥ इति ॥ आचार्यः आपोहिष्ठेति शिशुं पंचगव्येनाभिषिञ्चेत् ॥

तत्रमंत्रः ।। ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जे दधातन महे-
रणाय चक्षसे ।। ॐ यो वः शिवतमोरसस्तस्यभाजयते हनः
उसतीरिव मातरः ।। ॐतस्माऽअरङ्गमामवो यस्य क्षयाय
जिन्वथ । आपोजनयथाचनः ।। ततः पिता गोमुखप्रसव-
कर्मणः पुण्याहं भवन्तो ब्रुवन्तु ।। आचार्यः ॐपुण्याहं
पुण्याहं पुण्याहंमिति ब्रूयात् ।। ततो आचार्याय सवत्सां गां
दत्वा ।। तत्रसंकल्पः ।। अमुकमासे अमुकपक्षे अमुकतिथौ
अमुकवासरे अमुकगोत्रः अमुकशर्मा सपत्निकोऽहं कृतैतत्
गोमुखप्रसवशांतिकर्मणः साङ्गतासिद्ध्यर्थं इमां गां सवत्सां ४
सोपस्करसहितां रुद्रदैवत्याममुकगोत्रायामुकशर्मणे ब्राह्मणा-
याचार्याय तुभ्यमहं सम्प्रददे ।। दक्षिणासंकल्पः कृतैतत्सव-

त्सगोदानकर्मणः सांगतासिद्ध्यर्थं दक्षिणाद्रव्यं आचार्याय तुभ्यमहं सम्प्रददे ॥ यथाशक्ति ग्रहप्रीत्यर्थं गोवस्त्र स्वर्णधान्यादि दत्वा भूयसीं दक्षिणां दद्यात ॥ देशकालौ संकीर्त्य गोत्रः शर्मा सपत्निकोहं कृतैतत् गोमुखप्रसव शांतिकर्मणः सांगतासिद्ध्यर्थं तन्मध्ये न्यूनातिरिक्त दोषपरिहारार्थं नानानां गोत्रेभ्यो ब्राह्मणेभ्यः भूयसीं दक्षिणां विभज्य दातुमहमुत्सृजे ॥ ततो आचार्यः पंचभू संस्कारपूर्वक मग्निं प्रतिष्ठाप्य ॥ समंत्रकग्रहान्संस्थाप्य सम्पूज्य ॥ ततो कुशकण्डिकां विधाय ॥ आज्यभागांतंकृत्वा आपोहिष्ठेतितृचेन अप्सुम इत्यृचा च विष्णुं तद्विष्णोरित्यृचा यक्ष्महणमक्षीभ्यामिति सूक्तेन ग्रहांश्च प्रत्येकमष्टादिसंख्यया दधिम-

ध्वाज्यैः शेषेण स्विष्टकृदंतं च कुर्यात् ॥ ततोऽग्नेरीशान्यां कुम्भं संस्थाप्य तत्र पंचगव्यतिलव्रीहिचीरिद्रुमकषायान् क्षिप्त्वा वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रोपरि तद्विष्णोरितिमंत्रेण विष्णु-प्रतिमां तत्वायामि इतिवरुणस्याक्षीभ्यामिति यद्मण्हणश्चप्रति-मामभ्यर्च्य इन्द्रेति षड्ऋचो जप्त्वाऽन्वाधानक्रमेण हुत्वा कर्मशेषं समापयेत् ॥ तत्रक्रमः ॥ कलशस्थापनविधिना कलशं प्रतिष्ठाप्य तस्योपरिॐ तद्विष्णोः परमंपदं सदा पश्य-न्ति सूरयः ॥ दिवीव चक्षुराततम् ॥ विष्णवे नमः । विष्णुं० ॥ ॐतत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः॥ अहेडमानो वरुणेहवोध्युरुशर्ठ० समान आयुः प्रमोषीः ॥ वरुणाय नमः । वरुणमा० ॥ ॐअक्षीभ्यांते नासिकाभ्यां

कर्णाभ्यां चिबुकादधि ॥ यक्ष्मशीर्षण्यंमस्तिष्का जिह्वाया
विवृहामि ते ॥ यक्ष्मणेनमः ॥ यक्ष्माणमावा० ॥ ॐमनोजूति-
र्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञठं० समि-
मन्दधातु ॥ विश्वेदेवा सऽइहमादयन्तामोरँ ॥ प्रतिष्ठ ॥
विष्णवाद्यावाहितदेवताः सुप्रतिष्ठितावरदाभवत ॥ इतिप्रति-
ष्ठाप्य ॥ विष्णवाद्यावाहितदेवताभ्योनमः इतिसम्पूज्य ॥
ततो कुम्भं स्पृष्ट्वा वक्ष्यमाणमंत्रान् जपेत् ॥ ॐयतइन्द्रं
भयामहे ततोनोऽअभयंकृधि ॥ मघवञ्छग्धितवतन्नऽऊतिभि-
र्विद्विषो विमृधो जहि ॥ १ ॥ त्वं हि राधसस्पते राधसोमहः
क्षयस्यांसि विधत्तः ॥ तं त्वा वयं मघवन्निन्द्रगिर्वणः ॥
सुतावन्तो हवामहे ॥ २ ॥ इन्द्रस्य कुत वृत्रहा परस्यानो

वरेण्यः ॥ सनोरद्विश्वचरमं समध्यमं सपश्चात्पातु नः पुरः ॥३॥
त्वन्नः पश्चादधरादुत्तरा पुरऽइन्द्रं निपाहि विश्वतः ॥ आरे
अस्मत्कृणुहि दैव्यं भयमारेहेतीरदेवीः ॥ ४ ॥ अद्याद्याश्व
श्च इन्द्रत्राश्वपरेचनः ॥ विश्वाचनोजरितृन्त्सत्पते अहा
दिवा नक्तं चरक्षिषः ॥ ५ ॥ प्रभंगीशूरो मघवा तुवी मघः
संमिश्लोवीर्यायकम् ॥ उभाते वाहू वृषणा शतक्रतो
निया वज्रं मिमिक्षतुः ॥ ६ ॥ इतिजप्त्वा ॥ मिलितैर्दधि
मध्वाज्यैर्होमं कुर्यात् ॥ ॐप्रजापतयेस्वाहा । इदंप्रजापतये-
नमम ॥ ॐ इन्द्रायस्वाहा । इदमिन्द्राय० ॥ ओं अग्नये-
स्वाहा ॥ इदमग्नये० ॥ ओं सोमायस्वाहा ॥ इदंसोमाय०॥
इमानि हवनीयद्रव्याणि यायां यक्ष्माण देवतास्ताभ्यस्ताभ्यो

मया परित्यक्तं नमम यथा दैवतमस्तु ॥ ओं आपोहिष्ठा मयो भुवस्ताऽऊर्जे दधातन । महे रणाय चक्षसे स्वाहा ॥१॥ इदमद्भ्यो० ॥१॥ ओं योवःशिवतमो रसस्तस्य भाजयतेहनः उशतीरिवमातरः स्वाहा ॥ इदमद्भ्यो० ॥ २ ॥ ओंतस्माऽ अरंगमामवो यस्यक्षयाय जिन्वथ॥ आपो जन यथा च नः स्वाहा ॥ इदमद्भ्यो० ॥ ३ ॥ ओंअप्सुमे सोमोऽअब्रवीदन्त र्विश्वानि भेषजाः ॥ अग्निच विश्वंभुवमापश्च विश्व भेषजीः स्वाहा॥ इदमद्भ्यो०॥१॥ ओं तद्विष्णोः परमंपदं सदा- पश्यन्ति सूरयः ॥ दिवीव चक्षुराततं स्वाहा ॥ इदं विष्णवे० ॥२॥ ओं अक्षीभ्यांनासिकाभ्यां कर्णाभ्यां चिबुकादधि यक्ष्मं शीर्षण्यं मस्तिष्काज्जिव्हाया विवृहामि ते स्वाहा ॥ इदं

स्वाहा ॥ इदं वरुणायादित्याया॰ ॥ ओंप्रजापतये स्वाहा ॥
इदंप्रजापतये नमम ॥ संस्रवप्राशनम् ॥ आचमनम् ॥
पवित्राभ्यामार्जनम् ॥ ब्रह्मणे पूर्णपात्रदानम् ॥ कृतैतत्
गोमुखप्रसवशांतिकर्मणोंगतया विहितमिदं पूर्णपात्रं
प्रजापति दैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्य-
महं सम्प्रददे ॥ अग्नेपश्चात्प्रणीता विमोकः । उपयमन-
कुशैः विमोकोदकेन मार्जयेत् ॥ तत्रमंत्रः ॥ ओं आपः शिवाः
शिव तमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥
ब्राह्मण भोजन संकल्पः ॥ कृतैतद्गोमुखप्रसवशांति
कर्मणः सांगतासिद्ध्यर्थं यथासंख्याकान्ब्राह्मणान्भोजयिष्ये ॥
भूयसीं दक्षिणां ॥ पूर्ववत्संकल्पं कृत्वा ॥ प्रमादात्कुर्वतांकर्म

प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति-
श्रुतिः ॥ यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ॥
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥ इति विसर्जनम् ॥
इतिगोमुखप्रसवशांतिप्रयोगः ॥

श्रीगणेशाय नमः ॥ अथमूलशान्ति विधिः ॥ शौनकः ॥
अथातः संप्रवक्ष्यामि मूलजातहिताय वै ॥ मातापित्रो-
र्धनस्यापि कुलज्ञातिहिताय च ॥ त्यागो वा मूलजातस्य
ह्यष्टाब्दाद्वा प्रदर्शनम् ॥ अभुक्तमूलजातानां परित्यागो
विधीयते ॥ अदर्शनाद्वापि पितुः सतु तिष्ठेत्समाष्टकम् ॥
लल्लः ॥ अभुक्तमूलसम्भवं परित्यजेत्तु बालकम् ॥ समा-
ष्टकं पिताऽथवा न तन्मुखं विलोकयेत् ॥ तद्वाद्य पादके पिता

विपद्यथे ॥ जनन्यथ तृतीयके धनक्षयश्चतुर्थके शुभावहम् ॥
प्रतीपमन्यपादतः फलं तदेव सार्पभे ॥ अभुक्तमूलं त्वाह-
बृहद्वसिष्ठः ॥ ज्येष्ठान्ते घटिकाचैका मूलादौ घटिकाद्वयम् ॥
अभुक्तमूलमित्याहुर्जातं तत्र विवर्जयेत् ॥ केचिज्जेष्ठान्त्यं
मूलाद्यंच पादमभुक्तमूलमित्याहुः ॥ कश्यपेन त्वन्यथोक्तम् ॥
मूलाद्यपादजो हन्ति पितरं तु द्वितीयज ॥ मातरं स्वां
तृतीयोर्थान्सुहृदन्तु तुरीयजः ॥ फलं तदेव सार्पर्क्षे प्रतीपं
त्वन्यपादजः ॥ एवं दुहितरि प्रोक्तं मूलजायां फलं बुधैः ।
कन्यायां तु विशेषः ॥ न बाला हंति मूलर्क्षे पितरं मातरं
तथा ॥ मूलजा श्वशुरं हन्ति व्यालजा च तदङ्गनाम् ॥

टि० १ व्याल–अश्लेषा

महेन्द्रं चाग्रजं हन्ति देवरञ्च द्विदैवजा ॥ अथातो मूल विधिं व्याख्यास्यामो मूलांशे प्रथमे पितुर्नैष्टो द्वितीये मातुस्तृतीये धनधान्ययोश्चतुर्थे कुलशोकावहः स्वयम् पुण्यभागी स्यान्मूलनक्षत्रे मूलविधानं कुर्यात् ॥ शांतिर्वा पुष्कला चेत्स्यात्तर्हि दोषो न कश्चन इति ॥ मुख्यकालं प्रवक्ष्यामि शान्तिहोमजपं ततः ॥ जातस्य द्वादशाहे च जन्मर्क्षे वा शुभे दिने ॥ समाष्टके द्वादशाब्दे कुर्याच्छान्तिकमादरात् ॥ अथ प्रयोगः ॥ यथोक्तकाले गोमुखप्रसवं कृत्वा ॥ ततो यजमानः सपत्नीकः सबालकः भद्रासनोपरि प्राङ्मुखोपविश्य आचम्य प्राणानायम्य ॥ हस्ते अक्षतपुष्पाणि गृहीत्वा आनो-

---

१ माहेन्द्र–ज्येष्ठा २ अग्रजः पत्युर्ज्येष्ठभ्राता ३ द्विदैवजा विशाखा ।

भद्रादीन् सुमुखश्चैकदंतश्चेत्यादि मंगलमंत्रान्पठेत् ततः कुशपुष्पाक्षतजलान्यादाय ॥ देशकालौ संकीर्त्य गोत्रः शर्मा सपत्नीकोऽहं अस्य बालकस्य मूलनक्षत्र-जननारिष्टशान्त्यर्थं पंचाभिमंत्रित कलशैः स्नानमहं करिष्ये। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनमहं करिष्ये यथोपचारैः गणेशं संपूज्य ॥ स्वपुरतः श्वेतपङ्कजं विरच्य तत्रोपरि सप्तधान्यराशिं कृत्वा तत्र मध्ये शतच्छिद्रं कलशं निधाय तच्चतुर्दिक्षु पूर्वादिक्रमेण (वा ईशानादिक्रमेण) चतुर्कुंभान् स्थापनविधिना स्थापयेत् ॥ तत्र प्राक्कुंभे देवदारु, रक्तचंदन, कमल, कुष्ट, प्रियंगु, शुंठा, मुस्ता, आमलक, वच, सर्षप, अगर, मुरा, मांसी, ऋद्धि, वृद्धि, उशीर, इत्यादीनि

निःक्षिपेत् ॥ रुद्राध्यायं जपेत् ॥ दक्षिणकुम्भे पंचामृत-गजमदतीर्थोदकसप्तधान्यसुवर्णानि निःक्षिपेत् ॥ आशुःशिशान १२ मंत्रान् जपेत् ॥ पश्चिमकुम्भे सप्तमृत्तिकाः क्षिपेत् कृणुष्वपाजः पंचमंत्रान् जपेत् ॥ उत्तरकुम्भे पंचरत्न-वट अश्वत्थ-पलाश-प्लक्ष-उदुम्बर-पल्लवान् ॥ जम्बूनिम्बकदम्बचिंचि-डीक-वट-उदुम्बरप्लक्ष-आम्रमूलत्वचः (छाल) सप्तविंशति कूपजलानि च निःक्षिपेत् ॥ रक्षोहणं चतुर्मंत्रान् जपेत् ॥ मध्यगते शतच्छिद्रकुम्भे शतौषधयः तदभावे यथालाभं सद्वृक्षाणां पल्लवान्, विष्णुक्रांता सहदेवी तुलसी शतावरी कुश-कुंकुमानि च निःक्षिपेत् ॥ त्र्यम्बकमिति अष्टोत्तरशतं जपेत् तत्र सर्वेषु कुंभेषु स्थापनविधिना संस्थाप्य तत्र पूर्णपात्रो-

परि वरुणमावाह्य पूजनं कुर्यात् ॥ पूजनान्ते वंशपात्रे
कम्बलखण्डं प्रसार्य तस्योपरि शतच्छिद्रं कलशं निधाय
तन्मध्ये चतुःकुम्भस्थजलं प्रक्षिप्य अभिषेकमंत्रेण यज-
मानः सपत्नीकः बालकस्योपरि जलधारां कुर्यात् ॥ तत्र
मंत्रः ॥ ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो
हस्ताभ्याम् ॥ सरस्वत्यै वाचो यन्तु र्यंत्रिये दधामि बृहस्पतेष्ट्वा
साम्म्राज्येनाभिषिञ्चाम्यसौ ॥ ॐ देवस्यत्वा० ॥ सरस्वत्यैव्वाचो-
यन्तुर्यंत्रेणाग्नेः साम्राज्ये नाभिषिञ्चामि ॥ ॐ देवस्यत्वा० ॥
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै
भैषज्येन व्वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय
श्रियै यशसेऽभिषिञ्चामि ॥ ॐ विश्वानि देवसवितर्दुरि-

तानि परासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ॐधामच्छदग्नि-
रिन्द्रो ब्रह्मादेवो बृहस्पतिः ॥ सचेतसो विश्वेदेवा यज्ञं प्राव-
न्तुनः शुभे ॥ त्वं यविष्ठदाशुषोनॄँः पाहि शृणुधी गिरः ॥
रक्षातोकमुतत्मना ॥ अन्नपतेन्नस्य नोधेह्यनमीवस्य शुष्मि
णः ॥ प्रप्रदातारंतारिषऽउर्ज्जन्नोधेहि द्विपदे चतुष्पदे ॥
ॐ द्यौः शांतिरन्तरिक्ष ठं॰ शान्तिः पृथिवीशांतिरापः शांति-
रोषधयः शांतिः वनस्पतयः शांतिर्विश्वेदेवाः शांतिर्ब्रह्मशांतिः
सर्वठं॰ शांतिः शांतिरेव शांतिः सामाशांतिरेधि ॥ यतोयतः
समीहसे ततो नोऽअभयं कुरु ॥ शन्नः कुरुप्रजाभ्यो
भयन्नः पशुभ्यः ॥ इति ॥ ततो यजमानः सपत्नीकः
क्षौरनखनिकृन्तनं विधाय कृताभ्यङ्गो स्नानं कुर्यात्

धौते वाससी परिधाय आचम्य शुभासने प्राङ्मुखोपविश्य स्वदक्षिणतः पत्नीं चोपवेश्य ॐ केशवायनमः ॥ ॐ नारायणाय नमः ॥ ॐ माधवाय नमः ॥ इतित्रिराचम्य ॥ ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ इति पवित्रधारणं कृत्वा प्राणायामत्रयं कुर्यात् ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं पूजासामग्रीं च संप्रोक्ष्य ॥ हस्ते अक्षतपुष्पाणि गृहीत्वा आनोभद्रादीन्मंगलमंत्रान्पठेत् ॥ कुशपुष्पयवाक्षतजलद्रव्यञ्चादाय संकल्पं कुर्यात् ॥ ॐ विष्णुर्विष्णुर्विष्णुः

श्रीमद्भगवतो महापुरुषस्य विष्णुराज्ञया प्रवर्तमानस्य अद्य-श्रीब्रह्मणोह्निद्वितीयेऽ प्रहरार्द्धे विष्णुपदे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशातितमे युगे कलियुगे कलिप्र-थमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्तैकदेशे (काश्यां अविमुक्तवाराणसीक्षेत्रे आनन्दवने महाश्मशाने गौरीमुखे त्रिकण्टकविराजिते) अन्यत्र तु ॥ प्रजापतिक्षेत्रे भागीरथ्याः अमुकभागे विक्रमशके बौद्धावतारे अमुकनाम-संवत्सरे श्रीसूर्ये अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अ-मुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशि स्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथा-यथा

स्थानस्थितेषु एवं ग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुक शर्मा सपत्नीकोऽहं ममात्मनः श्रुतिस्मृति-पुराणोक्तफलप्राप्त्यर्थं अस्य बालकस्य मूलनक्षत्रजनन (वा श्लेषा मघा ज्येष्ठा इत्यादि ऊहः कार्यः) सूचितपित्रादि स-र्वारिष्टपरिहारद्वारेण श्रीपरमेश्वरप्रीत्यर्थं मूलशान्तिं करिष्ये ॥ तदङ्गत्वेन स्वस्ति पुण्याहवाचनं मातृकापूजनं वसोर्द्धारा-पूजनं आयुष्यमन्त्रजपं नान्दीश्राद्धं आचार्यादिवरणानि च करिष्ये ॥ तत्रादौ निर्विघ्नतासिध्यर्थं गणेशाम्बिकयोः पूजनं च करिष्ये । (गणेशपूजनादारभ्य दिग्रक्षणं प्रोक्षणान्तं ग्रहशान्त्यनुसारेण सर्वं कुर्यात्) ततः प्राग्भद्र-पीठोपरि वस्त्रं प्रसार्य चतुर्विंशतिदलं पद्मं कृत्वा तस्योपरि

कलशं प्रतिष्ठाप्य पूर्णपात्रोपरि स्वर्णमयीं निऋ॑तिं प्रतिमां अधिदेवताप्रत्यधिदेवतासहितामग्न्युत्तारणपूर्वकं स्थापयेत् ।। तत्र निऋ॑तिमंत्रः ।। ॐ असुन्वन्तम यजमान मिच्छस्तेन सेत्यामन्विहि तस्करस्य ।। अन्यमस्मदिच्छ सातऽइत्यानमो देविनिऋ॑ते तुभ्यमस्तु ।। इति निऋ॑ति मंत्रः ।। ततोऽधिदेवता इन्द्र मंत्रः ।। ॐ त्रातारमिन्द्रमविता-रमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ।। ह्वयामि शक्रं पुरुहूत-मिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः ।। ततः प्रत्यधिदेवता अपमंत्रः ।। ॐ आपोहिष्ठा मयोभुव स्तान ऊर्ज्जे दधातन ॥ महेरणाय चक्षसे । एवं अश्लेषायां सार्पं, मघायां पितृ, ज्येष्ठायां इन्द्र, रेवत्यां पूषा, अश्विन्यां अश्वि

नीं प्रतिमां तत्तन्मंत्रेण अधिपूत्यधिसहितां स्थापयेत् आवाह्यपूजयेत् ॥ (ततोऽश्लेषामंत्रः) ॐ नमोस्तु सर्पेभ्यो येकेच पृथिवीमनु ॥ येऽ अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ मघामंत्रः ॥ ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि ॥ उशन्नुशतऽआवह पितॄन्हविषेऽ अत्तवे ॥ ज्येष्ठामंत्रः ॥ ॐ सयोषाऽइन्द्रसगणोमरुद्भिः सोमं पिब वृत्रहा शूरविद्वान् ॥ जहिशत्रूँरपमृधोनुदस्वाथा भयं कृणुहि विश्वतोनः ॥ रेवतीमंत्रः ॥ ॐपूष न्तवव्रते वयं नरिष्येम कदाचन ॥ स्तोतारस्त इहस्मसि ॥ अश्विनीमंत्रः॥ ॐ यावाङ्कशा मधुमत्यश्विना सूनृतावती ॥ तया यज्ञं मिमि-क्षितम् । अग्न्युत्तारणं प्राणप्रतिष्ठां च ग्रहशान्त्यनुसारेण

कुर्यात् ॥ ततः प्रागादितः चतुर्विंशति पंकजदलेषु क्रमेण चतुर्विंशतिनक्षत्र देवतामावाह्येत् ॥ तत्रक्रमः ॥ ॐ भू० विश्वेभ्यो देवेभ्योनमः ॥ विश्वान्देवाना० ॥ १ ॥ ॐ भू० विष्णावेनमः विष्णुं० ॥ २ ॥ ॐ भू० अष्टवसुभ्यो० अष्टवसूना० ॥ ३ ॥ ॐ भू० वरुणायनमः वरुणं० ॥ ४ ॥ ॐ भू० अजैकपदे-अजैकपादं० ॥ ५ ॥ ॐ भू० अहिर्बुध्न्याय० अहिर्बुध्न्यं० ॥ ६ ॥ ॐ भू० पूष्णे-पूषाणं० ॥ ७ ॥ ॐ भू० अश्विभ्यां० अश्विनौ० ॥ ८ ॥ ॐ भू० यमाय० यमं० ॥ ९ ॥ ॐ भू० अग्नये नमः अग्निमा० ॥ १० ॥ ॐ भू० प्रजापतये नमः प्रजापतिमा० ॥ ११ ॥ ॐ भू० सोमायनमः सोममा० ॥ १२ ॥ ॐ भू० रुद्रायनमः रुद्रमा०

॥ १३ ॥ ॐ भू० अदितयेनमः अदितिमा० ॥ १४ ॥
ॐ भू० बृहस्पतयेनमः बृहस्पतिमा० ॥ १५ ॥ ॐ भू०सर्पे-
भ्योनमः सर्पाना० ॥१६॥ ॐ भू० पितृभ्योनमःपितॄन् ॥१७॥
ॐ भू० भगायनमः भगं० ॥ १८ ॥ ॐ भू० अर्यम्णो नमः
अर्यमाणं० ॥१६॥ ॐ भू० सवित्रेनमः सवितारं० ॥२०॥
ॐ भू० विश्वकर्मणेनमः विश्वकर्माणं० ॥ २१ ॥ ॐ भू०
वायवेनमः वायुं० ॥२२॥ भू० इन्द्राग्निभ्यांनमः इन्द्राग्न्योः
॥ २३ ॥ ॐ भू० मित्रायनमः मित्रं० ॥२४॥ पुनः पूर्वादि-
क्रमेण अष्टलोकपालानावाहयेत् ॥ पूर्वे ॐ भू० इन्द्रायनमः
इन्द्रमा० ॥ १ ॥ आग्नेय्यां ॐ भू० अग्नयेनमः अग्निमा-
वाह० ॥ १ ॥ दक्षिणे ॐ भू० यमायनमः यममा० ॥ ३ ॥

नैर्ऋत्ये ॐ भू० निर्ऋतयेनमः नैर्ऋतिमा० ॥४॥ पश्चिमे ॐ भू० वरुणाय नमः वरुण मा० ॥५॥ वायव्यां ॐ भू० वायवे नमः वायुमा० ॥६॥ उत्तरे ॐ भू० सोमायनमः सोमं० ॥७॥ ईशान्यां ॐ भू० ईशानाय नमः ईशानं० ॥८॥ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाःक्षरन्तुच ॥ अस्यै देवत्वमर्चायै मामहेतिच्च कश्चन ॥ ॐमनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टं यज्ञठं० समिमन्दधातु ॥ विश्वेदेवासऽइहमा दयन्तामों प्रतिष्ठ ॥ नैर्ऋत्यादिदेवताः सुप्रतिष्ठिताः वरदा भवन्तु ॥ नैर्ऋत्याद्यावाहित देवताभ्योनमः इतिपाद्यादिभिर्यथोपचारैः सम्पूजयेत् ॥ ततोऽग्निस्थापनम् ॥ अस्मिन् मूलशांति-कर्मणि पञ्चभूसंस्कारपूर्वकम् अग्निस्थापनं करिष्ये ॥ तत्र

क्रमः ॥ कुशैः परिसमुह्य तान्कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवेण वा प्रागग्रप्रादेशमात्रं उत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेण अनामिकांगुष्ठेनोद्धृत्य जलेनाभ्युक्ष्य तत्र तूष्णीं कांस्यपात्रस्थमग्निमानीय ॐ अग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे देवां आसादयादिह ॥ इति स्वाभिमुखं स्थापयेत् ॥ अग्निपात्रे गन्धाक्षतादि दत्वा ॥ ततोऽग्नेरीशान्यां भद्रपीठोपरि नवग्रहान् संस्थाप्य तत्तन्मंत्रैः सम्पूज्य ॥ तत्र क्रमः॥ ॐ आकृष्णेन० सूर्याय० सूर्यं ॥ ॐ इमन्देवा० ॥ सोमाय०॥ सोमं० ॐ अग्निर्मूर्धा० भौमाय०भौमं ॥ ॐ उद्बुध्य० बुधाय० बुधं ॥ॐ बृहस्पतेअ०बृहस्पतये० बृहस्पतिं०॥ ॐ अन्नात्परि०

शुक्राय० शुक्रं ॥ ॐ शन्नो देवी० शनैश्चराय० शनैश्चरं ॥ ॐ
कयानश्चित्र० राहवे० राहुं०॥ ॐ केतुं कृण्व० केतवे० केतुं०॥६॥
(अधिदेवता दक्षिणे) ॐ त्र्यम्बकं० ईश्वराय० ईश्वरं० ॥
ॐ श्रीश्चते० उमायै० उमां० ॥ ॐ यदक्रंदः प्र० स्कंदाय०
स्कन्दं० ॥ ॐ विष्णोरराट० विष्णवे० विष्णुं० ॥ ॐ आ-
ब्रह्मन्० ब्रह्मणे० ब्रह्माणं० ॥ ॐ सयोषाइन्द्र० इन्द्राय० इन्द्रं ॥
ॐ यमायत्वा० यमाय० यमं० ॥ ॐ कार्षिरसि० कालाय०
कालमा० ॥ ॐ चित्रावसो० चित्रगुप्ताय० चित्रगुप्तम् ॥ अथ
प्रत्यधि देवता वामे ॥ ॐ अग्निं दूतं०॥ अग्नये० अग्निमा०॥
ॐ आपोहिष्ठा० अद्भ्योन० अपः आ० ॥ ॐ स्योना पृ०
पृथिव्यै० पृथिवीं०॥ ॐ इदं विष्णु० विष्णवे० विष्णुं० ॥ ॐ

इन्द्रऽआसा॰ इन्द्राय॰ इन्द्रं॰॥ ॐ अदित्यै रास्ना॰ ॥ इन्द्राण्यै॰ इन्द्राणीं॰ ॥ ॐ प्रजापते॰ प्रजापतये॰ प्रजापतिं॰ ॥ ॐ नमोस्तुसर्पेभ्यो॰ सर्पेभ्यो॰ सर्पान्॰ ॥ ॐ ब्रह्मयज्ञानं॰ ब्रह्मणे॰ ब्रह्माणं॰ ॥ ततः पंचलोकपालान् सूर्योत्तरे ॥ ॐ गणानान्त्वा॰ गणपतये॰ गणपतिं॰ ॥ ॐ अम्बेऽअम्बिके॰ दुर्गायै॰ दुर्गां॰ ॥ ॐ वायोयेते॰ वायवे॰ वायुं॰ ॥ ॐ घृतं घृतपावा॰ आकाशाय॰ आकाशं॰ ॥ ॐ यावाङ्कशा॰ अश्विभ्यां॰ अश्विनौ॰ ॥ ॐ वास्तोष्पते॰ ॥ वास्तोष्पतये॰ वास्तोष्पतिं॰ ॥ ॐ नहिस्पश॰ क्षेत्रपालाय॰ क्षेत्रपालं॰ ॥ ततो मण्डलाद्बाह्ये दश दिक्पालानावाहयेत् ॥ ॐ त्रातारमिन्द्र॰ इंद्राय॰ इंद्रं॰ ॥ ॐ त्वन्नोऽअग्ने तव॰ अग्नये॰

अग्नि० ॥ ॐ यमायत्वां० ॥ यमाय० यमं० ॥ ॐ असुन्वं तम० निर्ऋतये० निर्ऋतिं० ॥ ॐ तत्वायामि० वरुणाय० वरुणं० ॥ ॐ आनो नियुद्भि० ॥ वायवे० वायुं० ॥ ॐ वयठं० सोम० ॥ कुबेराय० कुबेरं० ॥ ॐ तमीशानं० ॥ ईशानाय० ईशानं० ॥ ॐ अस्मे रुद्रा० ब्रह्मणे० ब्रह्माणं० ॥ ॐ स्योना० अनन्ताय० अनन्तं० ॥ अस्यै प्राणा प्रतिष्ठंतु० ॥ ॐ मनोजूतिर्जु० ॥ ॐ सूर्यादि अनन्तान्ता देवताः सुप्रतिष्ठिताः वरदाः भवन्तु ॥ सूर्यादि अनन्तांत-देवताभ्यो नमः इति षोडशोपचारैः पूजयेत् ॥ ॐ ग्रहाऽऊर्ज्जा हुतयो व्यन्तो विप्राय मतिम् ॥ तेषां व्विशि प्रियाणां वोहमिषमूर्जठं० समग्रभमुपयामगृहीतोसीन्द्रायत्वा जुष्टं

गृह्णाम्येषते योनिरिन्द्रायत्वा जुष्टतमम् ॥ ग्रहस्येशानदिग्-
भागे कलशस्थापनविधिना रुद्रकलशं संस्थाप्य कलशे
वरुणं असंख्यातरुद्रांश्चावाह्य पूजयेत् ॐ असंख्याता सह-
स्राणि ये रुद्राऽअधिभूम्याम् ॥ तेषाठं० सहस्रयोजने वधन्वा
नितन्मसि ॥ असंख्यातरुद्रेभ्यो० असंख्यातरुद्रान्० ॥
अथकुशकण्डिकाम् ॥ अग्नेर्दक्षिणतो ब्रह्मासनम् ॥ अग्नेरुत्तरतः
प्रणीतासनद्वयं ॥ ब्रह्मासने ब्रह्मोपवेशनम् ॥ यावत्कर्म
समाप्यते तावत्त्वं ब्रह्मा भव ॥ भवामीति प्रतिवचनम् ॥
प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य प्रथ-
मासने निधाय ॥ ब्रह्मणोमुखमवलोक्याग्नेरुत्तरतः द्वितीया-
सने निदध्यात् ॥ ईशानादिपूर्वाग्रैः कुशैः परिस्तरणम् ॥

आग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्यन्तं ॥ नैर्ऋत्याद्वायव्या-
न्तं ॥ अग्नितः प्रणीतापर्यन्तम् ॥ अथ पात्रासादनम् ॥
पश्चादुत्तरतो वास्यात ॥ पवित्रच्छेदनार्थं कुशत्रयं ॥ पवि-
त्रार्थं साग्रमनंन्तरगर्भकुशपत्रद्वयम् ॥ प्रोक्षणीपात्रं ॥
आज्यस्थाली ॥ संमार्जनकुशाः पञ्च ॥ उपयमनकुशाः
सप्त । समिधस्तिस्रः ॥ स्रुवः ॥ आज्यम् ॥ पूर्णपात्रं वृष-
निष्क्रयम् ॥ उपकल्पनीयानि पदार्थानि निधाय ॥ पवित्र-
करणम् ॥ द्वयोरुपरि त्रीणि निधाय द्वौ मूलेन प्रदक्षिणीकृत्य
त्रिभिः छिंद्य द्वौ ग्राह्यौ त्रिः त्याज्यः ॥ सपवित्रकरेण
प्रणीतोदकं त्रिः प्रोक्षणी पात्रे निधाय अनामिकांगुष्ठाभ्यां
गृहीतपवित्राभ्यां त्रिरुत्पवनम् ॥ प्रोक्षणी सव्यहस्ते कृत्वा

त्रिरुद्दिङ्गनम् ॥ प्रणीतोदकेन प्रोक्षणीप्रोत्त्रणम् । प्रोक्षणी-
जलेनासादितवस्तुसेचनम् । अग्निप्रणीतयोर्मध्ये प्रोक्षणीं
निधाय ॥ आज्यस्थाल्यामाज्यनिर्वापः ॥ अधिश्रयणम् ॥
ज्वलदुल्मुकेन पर्यग्निकरणम् इतरथा वृत्तिः । स्रुवप्रतपनम् ॥
सम्मार्गकुशैःसम्मार्जनम्॥अग्रैरन्तरतोमूलैर्बाह्यतः स्रुवं संमृज्य।
प्रणीतोदकेनाभ्युक्ष्य । संमार्गकुशानामग्नौ प्रक्षेपः पुनः प्रतप्य
दक्षिणदेशे निधाय । आज्यमग्नेरवतार्य प्रणीतापश्चिमतो
निधाय । अनामिकाङ्गुष्ठाभ्यां प्रोक्षणीवदुत्पूय अवेक्ष्य । पुनः
प्रोक्षणीउत्पूय ॥ आज्यमग्नेः पश्चिमतः निधाय । उपयमन-
कुशान्वामहस्ते कृत्वा । तिष्ठन्दक्षिणहस्ते समिधोभ्याधाय
प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समिधस्तिस्रः

अग्नौ प्रक्षिपेत् ॥ उपविश्य सपवित्रकरेण प्रोक्षण्युदकेन ईशानादारभ्य ईशानपर्यन्तमग्निं पर्युक्ष्य पवित्रे प्रणीतापात्रे निधाय ॥ दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धः स्रुवेणाघारा-वाज्यभागौ हुत्वा ॥ ॐ प्रजापतयेस्वाहा । इदं प्रजापतये नमम ॥ इतिस्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ ॐ इन्द्रायस्वाहा ॥ इदमिन्द्राय० ॥ इत्याघारः ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये० ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय० ॥ इत्याज्यभागौ ॥ ततोऽनन्वारब्धेन ग्रहाणामष्टाष्टसंख्याभिः आहुतीसंमित्तिलचर्वाज्यद्रव्यैर्जुहुयात् ॥ अस्मिन्मूलशांति कर्मणि इमानि हवनीयद्रव्याणि या या यक्ष्माणदेवतास्ताभ्यः स्ताभ्यो मया परित्यक्तं नमम ॥ यथादैवतमस्तु ॥ अथ

सूर्यादिग्रहाणां पूर्ववन्मंत्रेण होमं कुर्यात् ॥ अथ प्रधान-
होमः ॥ अष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिमष्टौवा जुहु-
यात् ॥ अथ मूलनक्षत्रमंत्रहोमः । ॐ असुन्वन्तम यजमान
मिच्छस्तेन स्येत्यामन्विहि तस्करस्य ॥ अन्यमस्म दिच्छ
सातऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ स्वाहा १०८॥
ततोऽधिदेवता इन्द्र मंत्रः ॥ ॐ सयोषाऽइन्द्रसगणो मरुद्भिः
सोमं पिब वृत्रहा शूर विद्वान् ॥ जहि शत्रूंऽ रप मृधो नुद
स्वाथावयं कृणुहि विश्वतोनः स्वाहा १०८ ॥ अथ प्रत्यधि
देवता ॥ अपमंत्रः ॥ ॐ आपोहिष्ठा मयो भुवस्तानऽऊर्ज्जे
दधातन ॥ महेरणाय चक्षसे स्वाहा ॥१०८॥ अथसार्प मंत्रः ॥
ॐ नमोस्तु सर्पेभ्यो येकेच पृथिवीमनु ॥ येऽअन्तरिक्षे ये

दिवितेभ्यः सर्पेभ्यो नमः स्वाहा ॥१०८॥ ततोऽधि देवता गुरु मंत्रः ॥ ॐ बृहस्पतेऽअति यदर्योऽअर्हाद्युमद्विभाति क्रतु- मज्जनेषु ॥ यद्दीदयच्छवसऽऋत प्रजा ततदस्मासु द्रविणं धेहि चित्रम् स्वाहा ॥१०८॥ अथ तत् प्रत्यधि देवता पितृ- मंत्रः ॥ ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि ॥ उशन्नुशतऽआवहपितृन्हविषेऽअत्तवे स्वाहा ॥१०८॥ अथ- मघानक्षत्रमंत्र होमः ॥ ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्पितरो मीमदन्तपितरोतीतृप- न्तपितरः पितरः शुन्धध्वम् स्वाहा ॥ १०८ ॥ तदधिदेवता सर्प मंत्रः ॥ ॐ नमोस्तु सर्पे० स्वाहा ॥१०८॥ तत् प्रत्यधि

देवता मंत्रः ॥ ॐ भगप्रणेतर्भग सत्य राधो भगे मान्धिय
मुद्वा ददन्नः ॥ भगप्रनोजनयगोभिरश्वैर्भगप्रनृभि
र्न्नृवन्तः स्याम स्वाहा ॥१०८॥ (अथ ज्येष्ठा नक्षत्र मंत्र
होमः) ॥ ॐ इन्द्रऽआसान्नेता बृहस्पति र्दक्षिणा यज्ञः
पुरऽएतु सोमः ॥ देवसेनानामभिभञ्जतीनाञ्जयन्ती-
नाम्मरुतो यन्त्वग्रम् स्वाहा ॥१०८॥ तदधि देवता मंत्रः ॥
ॐ मित्रस्यच ऋषणीधृतो वो देवस्य सानसि ॥ द्युम्नं चित्र-
श्रवस्तमम् स्वाहा ॥ १०८ ॥ तत् पूत्यधि देवता मंत्रः ॥ ॐ
असुन्वन्तम० स्वाहा ॥ १०८ ॥ अथ रेवती मंत्र होमः ॥ ॐ
पूषन्तवव्रते व्वयन्नरिष्येम कदाचन ॥ स्तोतारस्तऽइहस्मसि
स्वाहा ॥१०८॥ अधिदेवता मंत्रः ॥ ॐ शिवानामासि स्वधिति

स्ते पिता नमस्तेऽअस्तुमा माहि ठं० सीः ॥ निर्व्वर्त्तयाम्या युषे न्नाद्याय प्प्रजननाय राय स्पोषाय सुप्प्रजास्त्वाय सुवी-र्याय स्वाहा १०८॥ ततः प्रत्यधि देवतामंत्रः ॥ ॐ यावा-ङ्कशा० स्वाहा १०८॥अथाश्विनीनक्षत्र मंत्रः॥ ॐ अश्विना तेजसा चक्षुः प्प्राणेन सरस्वती व्वीर्य्यम् ॥ व्वाचेन्द्रो बलेने-न्द्राय दधुरिन्द्रियम् स्वाहा १०८॥ तदधि देवतामंत्रः ॥ ॐ पूषन्तव० स्वाहा १०८॥ अथ प्रत्यधि देवता मंत्रः ॥ ॐ यमायत्वाङ्गिरस्वते पितृमते स्वाहा स्वाहा घर्माय स्वाहा घर्मः पित्रे स्वाहा १०८॥ इति प्रधानादि देवता होम क्रमः ॥

ततो चतुर्विंशति दले चतुर्विंशद्देवानां प्रत्येकं अष्टा-

विंशति अष्ट संख्यया वा तत्तद्द्रव्यैर्जुहुयात् ॥ तद्यथा ॥ ॐ
विश्वेभ्यो देवेभ्यः स्वाहा ॥ इदं विश्वेभ्यो देवेभ्योनमम ॥१॥
ॐ विष्णवे स्वाहा ॥ इदं विष्णवे० ॥२॥ ॐ अष्टवसुभ्यः
स्वाहा ॥ इदं अष्टवसुभ्योनमम ॥३॥ ॐ वरुणाय स्वाहा ॥
इदं वरुणाय० ॥४॥ ॐ अजैकपदे स्वाहा ॥ इदं अजैक
पदे० ॥५॥ ॐ अहिर्बुध्न्याय स्वाहा ॥ इदं अहिर्बुध्न्याय०
॥ ६ ॥ ॐ पूषणे स्वाहा ॥ इदं पूषणे नमम ॥ ७ ॥ ॐ
अश्विभ्यां स्वाहा । इदमश्विभ्यां० ॥८॥ ॐ यमाय स्वाहा॥
इदं यमाय० ॥ ९ ॥ ॐ अग्नये स्वाहा । इदमग्नये० ॥१०॥
ॐ प्रजापतये स्वाहा । इदं प्रजापतयेन० ॥११॥ ॐ सोमाय
स्वाहा ॥ इदंसोमाय० ॥१२॥ ॐ रुद्राय स्वाहा॥ इदं रुद्राय०

॥१३॥ ॐ अदितये स्वाहा । इदमदितये० ॥ १४ ॥ ॐ बृहस्पतये स्वाहा ॥ इदं बृहस्पतये० ॥१५॥ ॐ सर्पेभ्यः स्वाहा । इदं सर्पेभ्यो० ॥१६॥ ॐ पितृभ्यः स्वाहा । इदं पितृभ्यो० ॥ १७ ॥ ॐ भगाय स्वाहा इदं भगाय० ॥ १८ ॥ ॐ अर्य्यम्णे स्वाहा । इदमर्य्यम्णे० ॥ १९ ॥ ॐ सवित्रे स्वाहा ॥ इदं सवित्रे० ॥ २० ॥ ॐ विश्वकर्मणे स्वाहा इदं विश्वकर्मणे० ॥ २१ ॥ ॐ वायवे स्वाहा ॥ इदं वायवे० ॥२२॥ ॐ इन्द्राग्निभ्यां स्वाहा । इदमिन्द्राग्निभ्यां नमम ॥ २३ ॥ ॐ मित्राय स्वाहा । इदं मित्राय० ॥२४॥ ॐ इन्द्राय स्वाहा इदमिन्द्राय० ॥१॥ ॐ अग्नये स्वाहा । इदमग्नये० ॥२॥ ॐ यमाय स्वाहा । इदं यमाय० ॥३॥

ॐ निर्ऋतये स्वाहा ॥ इदं निर्ऋतये० ॥४॥ ॐ वरुणाय स्वाहा । इदं वरुणाय० ॥५॥ ॐ वायवेस्वाहा । इदं वायवे० ॥ ६ ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय० ॥ ७ ॥ ॐ ईशानाय स्वाहा । इदं ईशानाय० ॥८॥ इति मूलनक्षत्र प्रधान देवता होमः ॥ अग्रे अश्लेषायां तु चतुर्विंशति नक्षत्र देवता क्रमः ॥ ॐ भगाय स्वाहा ॥ इदं भगाय० ॥ इत्यारभ्य पितॄनित्यन्तम् । ॐकारपूर्वकं चतुर्विंशति देवताः नाम मन्त्रेण जुहुयात् ॥ अथ मघा नक्षत्रेतु चतुर्विंशति नक्षत्र देवताः ॥ अर्यमण इत्यारभ्य भगान्तं पूजने होमे च ऊहः कुर्यात् ॥ ततः ज्येष्ठानक्षत्रे तु ॥ आप इत्यारभ्य इन्द्राग्निभ्यामित्यन्तम् ॥ रेवती नक्षत्रे तु ॥ चतुर्विंशति नक्षत्र

देवताः ॥ ॐ यममारभ्य अजैकपदान्तम् ॥ अश्विनी नक्षत्रे तु ॥ चतुर्विंशति देवता ॥ अग्नि इत्यारभ्य अहिर्बुध्न्यान्तम् ॥ एवं देवता क्रमः ॥ ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् स्वाहा ॥१०८ आहुतयः॥ अथ स्विष्टकृदादिहोमः ॥ ॐ अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव व्वयुनानि विद्वान् ॥ युयोध्यस्म ज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम ॥ ॐ स्वाहा स्वधा युताग्नये वैश्वानरायनमः इति मंत्रेणाग्निं सम्पूज्य ॥ हुतशेषद्रव्यं गृहीत्वा ब्रह्मणान्वारब्धःस्विष्टकृद्धोमं कुर्यात् ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥ इदमग्नयेस्विष्टकृते नमम ॥ ततोभूरादि

नवाहुतयः आज्येन ॥ ॐ भूः स्वाहा इदमग्नये ॥ ॐ भुवः स्वाहा। इदंवायवे॰ ॥ ॐ स्वः स्वाहा। इदंसूर्याय॰ ॥ ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्यहेडोऽअवयासि सीष्ठाः। यजिष्ठो व्वह्नितमः शोशुचानो व्विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्यां नमम ॥ ॐ सत्वन्नोऽअग्ने वमोभवोतीनेदिष्टोऽअस्याऽउषसो व्युष्टौ ॥ अवयक्ष्व-णो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो नऽएधि स्वाहा इदमग्नीवरुणाभ्यां नमम ॥ ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्च सत्वमित्व मयाऽअसि ॥ अयानो यज्ञं वहास्य यानो धेहि भेषजꣳ स्वाहा ॥ इदमग्नये अयसे नमम ॥ ॐ येते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता-

महान्तः ॥ तेभिर्नोऽअद्य सवितोतविष्णुर्विश्वे मुञ्चन्तु
मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे
विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च नमम ॥ ॐ
उदुत्तमं वरुणपाशमस्मदवाधमं व्विमध्यमठं० श्रथाय ॥
अथावयमादित्यव्रते तवानागसोऽअदितये स्याम स्वाहा ॥
इदं वरुणायादित्यादितये नमम ॥ ॐ प्रजापतये स्वाहा ।
इदं प्रजापतये नमम ॥ ततो हुतशेषं प्रोक्षणीपात्रे प्रक्षिपेत्
अथबलिदानम् ॥ ॐ प्राच्यै दिशेस्वाहार्वाच्यै दिशे स्वाहा
दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहा
र्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै
दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे

स्वाहा ॥ इन्द्रादिदशदिक्पालेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः एतान्सदीपमाषभक्तबलीन्समर्पयामि ॥ भोभो इन्द्रादिदशदिक्पालाः स्वां स्वां दिशं रक्षत बलिं भक्षत मम सकुटुम्बस्य सपरिवारस्य आयुःकर्तारः शांतिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः वरदाः भवत ॥ अनेन-बलिदानेन इन्द्रादिदशदिक्पालाः प्रीयन्ताम् ॥ ॐ ग्रहाऽऊर्ज्जा हुतयो व्यन्तोविप्राय मतिम् ॥ तेषां व्विशिप्रियाणां वोहमिषमूर्जꣳ समग्रभमुपयामगृहीतोसीन्द्रायत्वा जुष्टं गृह्णाम्येषते योनिरिन्द्रायत्वा जुष्टतमम् ॥ सूर्यादिग्रहेभ्यः अधिदेवताप्रत्यधिदेवतापंचलोकपालवास्तोष्पतिसहितेभ्यः एता० मम सकुटुम्बस्य० आयुःकर्तारः क्षेमकर्तारः शांतिकर्तारः

पुष्टिकर्तारः तुष्टिकर्तारः वरदाः भवत ॥ अनेन बलिदानेन सूर्यादिग्रहाः प्रीयन्ताम् ॥ अथ क्षेत्रपाल बलिः ॥ एकस्मिन्वंशादिपात्रे कुशानास्तीर्य तदुपरि आहारचतुर्गुणं द्विगुणं वा माषभक्तदध्योदनं वा जलपात्रंच निधाय चतुर्मुखं दीपं प्रज्वाल्य हरिद्राकुँकुमादिपताकायुतं कृत्वा ॥ असुन्वं० । क्षेत्रपालायनमः इति संपूज्य प्रार्थयेत् ॥ नमोवैक्षेत्रपालस्त्वं भूतप्रेतगणैस्सह ॥ पूजाबलिं गृहाणेमं सौम्यो भवतु सर्वदा ॥ आरोग्यं देहि मे देव निर्विघ्नं कुरु सर्वदा ॥ क्षेत्रपालाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय मारीगणभैरवराक्षस कूष्माण्डवेतालभूतप्रेतपिशाचशाकिनीडाकिनीपिशाचिनी गणसहिताय एतं सदीपमाषभक्तबलिं समर्पयामि ॥ भो

क्षेत्रपाल क्षेत्रं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शांतिकर्ता, पुष्टिकर्ता, तुष्टिकर्ता, वरदो भव ॥ अनेन बलिदानेन क्षेत्रपालः प्रीयतां न मम ॥ शूद्रः बलिं गृहीत्वा पत्नीबालकसहितयजमानस्योपरि सकृद्भ्रामयित्वा चतुष्पथे निःक्षिपेत् ॥ ततो यजमानः पृष्ठतो द्वारपर्यन्तं गत्वा हिङ्कारेणेति मंत्रेण जलं क्षिपेत् ॥ मंत्रः ॥ ॐ हिङ्कारायस्वाहा हिङ्कृताय स्वाहा क्रंदते स्वाहा वक्रंदाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गंधाय स्वाहा घ्राताय स्वाहा निविष्ठाय स्वाहोपविष्ठाय स्वाहा संदिताय स्वाहा वल्गते स्वाहा सीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय

स्वाहा त्रिच्चृत्ताय स्वाहा सङ्ग्हानाय स्वाहोपस्थिताय स्वाहा
यनाय स्वाहा प्रायणाय स्वाहा ॥ यजमानः पाणिपादं
प्रक्षाल्याचम्य ॥ नारिकेलादिफलं रक्तवस्त्रवेष्टितं द्वादश
षट्चतुःस्रुवेण गृहीतमाज्यं स्रुच्यां कृत्वा ॥ ॐ पूर्णा-
हुत्यै नमः इति सम्पूज्य ॥ पूर्णाहुतिं जुहुयात् ॥ ॐ मूर्द्धान-
न्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् ॥ कवि
ठं॰ सम्म्राजमतिथिं जनाना मासन्ना पात्रं जनयंत देवाः ॥
ॐ पूर्णा दर्विपरापत सुपूर्णापुनरापत ॥ वस्नेव विक्रीणा
वहाऽइषमूर्जं ठं॰ शतक्रतो स्वाहा ॥ इदमग्नये वैश्वानराय
नमम ॥ ततोवसोर्द्धारां जुहुयात् ॥ ॐ एकाच मे वसोः पवि
त्रमिति ॥ ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि

सहस्रधारम् ॥ देवस्त्वा सविता पुनातु वसोः पवित्रेण
शतधारेण सुप्वाकाम धुक्षः स्वाहा ॥ इदमग्नये० ॥ स्रवेण-
भस्मानीय ॥ ॐ त्र्यायुषं जमदग्ने इति ललाटे ॥ ॐ कश्य-
पस्य त्र्यायुषमिति ग्रीवायाम् ॥ ॐ यद्देवेषु त्र्यायुषं दक्षिण
बाहुमूले ॥ ॐ तन्नोऽअस्तु त्र्यायुषम् इति हृदि ॥ संस्रव-
प्राशनम् ॥ आचमनम् ॥ पवित्राभ्यां मार्जनम् ॥ ॐ सुमि-
त्रियानऽआपऽओषधयः सन्तु इति ॥ अग्नौ पवित्रप्रति-
पत्तिः ॥ ब्रह्मणे पूर्णपात्रदानम् ॥ कृतैतत् मूल-
जननशांतिहवनकर्मणः कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थं
इदं पूर्णपात्रं सदक्षिणाकं प्रजापतिदैवतं अमुकगोत्राया-
मुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ द्यौस्त्वा ददातु

पृथिवी त्वा प्रतिगृह्णातु ॥ अथाभिषेकः ॥ प्रधानकुंभस्थं जलमानीय ब्राह्मणाः पत्नी बालकसहितयजमानस्योपरि अभिषिञ्चेयुः ॥ तत्रमंत्राः ॥ ॐ देवस्यत्वा० सरस्वत्यै० भिषिञ्चाम्यसौ ॥ १ ॥ ॐ देवस्यत्वा० सरस्वत्यै० भिषिञ्चामि ॥ २ ॥ ॐदेवस्यत्वा० अश्विनोर्भैं० भिषिञ्चामि ॥३॥ योऽसौ वज्रधरो देवो महेन्द्रो गजवाहनः ॥ मूलजातशिशोर्दोषं मातृपित्रोर्व्यपोहतु ॥ १ ॥ योऽसौ शक्तिधरो देवो हुतभुङ्मेषवाहनः ॥ सप्तजिह्वश्च देवोऽग्निर्मूलदोषंऽव्यपोहतु ॥ २ ॥ योऽसौऽदण्डधरो देवो धर्मो महिषवाहनः ॥ मूलजातशिशोर्दोषं व्यपोहतु यमो मम ॥ ३ ॥ योऽसौ खड्गधरो देवो निर्ऋती राक्षसाधिपः ॥ प्रशामयतु मूलोत्थं

दोषं गण्डान्तसम्भवम् ॥ ४ ॥ योऽसौ पाशधरो देवो वरुणश्च जलेश्वरः ॥ नक्रवाहः प्रचेता वो मूलदोषं व्यपोहतु ॥ ५ ॥ योऽसौ देवो जगत्प्राणो मारुतो मृगवाहनः ॥ प्रशामयतु मूलोत्थं दोषं बालस्यशांतिदः ॥ ६ ॥ योऽसौ निधिपतिर्देवो खड्गभृद्वाजिवाहनः ॥ मातृपित्रोः शिशोश्चैव मूलदोषं व्यपोहतु ॥७॥ योऽसौ पशुपतिर्देवः पिनाकी वृषवाहनः ॥ आश्लेषामूलगण्डान्तं दोषमाशु व्यपोहतु ॥ ८ ॥ विघ्नेशः क्षेत्रपो दुर्गा लोकपाला नवग्रहाः ॥ मूलदोषप्रशमनं सर्वे कुर्वन्तु शांतिदाः ॥ मूलर्क्षे जातबालस्य मातृपित्रोर्धनस्यच ॥ भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु ॥ १० ॥ योऽसौ वागीश्वरो नाम ह्यधिदेवो बृहस्पतिः

मातृपित्रोः शिशोश्चैव गण्डान्तं स व्यपोहतु ॥ ११ ॥
पितरः सर्वभूतानां रक्षन्तु पितरः सदा ॥ सार्पनक्ष-
त्रजातस्य वित्तं च ज्ञातिबान्धवान् ॥ १२ ॥ एवं ज्येष्ठा-
दिशान्तौ सर्वत्र श्लोकेषु ऊहः कार्यः ॥ इतिविशेषः ॥ ॐ
सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो
जगन्नाथस्तथा सङ्कर्षणो विभुः ॥१॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु
विजयाय ते ॥ आखण्डलोऽग्निर्भगवान् यमोवैनिर्ऋतिस्तथा
॥ २ ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणा
साहताः सर्वे दिक्पालाः पान्तु ते सदा ॥ ३ ॥ कीर्तिर्लक्ष्मी-
र्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥ बुद्धिर्लज्जावपुः शान्तिः
कान्तिः तुष्टिश्च मातरः ॥ ४ ॥ एतास्त्वामभिषिञ्चन्तु देव-

पत्न्यः समागताः ॥ आदित्यश्चन्द्रमा भौमो बुधजीवसिता-
र्कजाः ॥५॥ ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयो मनवो
गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्स-
रसाङ्गणा ॥७॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि
च ॥ औषधानिच रत्नानि कालस्यावयवाश्च ये ॥८॥ सरितः
सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिञ्चन्तु
धर्मकामार्थसिद्धये ॥ ९ ॥ इति मंत्रेणाभिषिञ्चेत् ॥ ततः
शिरो मे श्रीर्यश इति स्वाङ्गानि स्पृशेत् ॥ मंत्रः॥ ॐ शिरोमे
श्रीर्यशो मुखन्त्विषिः केशाश्च श्मश्रूणि ॥ राजामे प्राणोऽअ-
मृतꣳ सम्राट् चक्षुर्विराट् श्रोत्रम् ॥१॥ जिह्वा मे भद्रं वाङ्महो-

मन्युः स्वराडभामः मोदाः प्रमोदाऽअङ्गुलीरङ्गानि मित्रं मे सहः ॥ २ ॥ बाहू मे बलमिन्द्रियं हस्तौ मे कर्म्मवीर्य्यम् ॥ आत्मा क्षत्रमुरोमम ॥३॥ पृष्ठीर्मे राष्ट्रमुदरमꣳसौ ग्रीवाश्च श्रोणी ऊरूऽअरत्नी जानुनी विशोमेङ्गानि सर्वतः ॥ ४ ॥ नाभिर्मे चित्तं विज्ञानं पायुर्म्मेऽपचितिर्भसत् ॥ आनन्दनन्दावाण्डोमे भगः सौभाग्यं यशः ॥५॥ जंघाभ्यां पद्भ्यां धर्मोऽस्मि व्विशि राजा प्रतिष्ठितः ॥ ततो घृतपूरितकांस्यपात्रे बालकस्य मुखावलोकनम् ॥ तत्रमंत्रः॥ ॐ रूपेणवो रूपमया गान्तुथो वो विश्ववेदा व्विभजतु ॥ ऋतस्य यथा प्रेतचन्द्र दक्षिणाविश्वः पश्यव्यन्तरिक्षं य्यत्तस्वसदस्यैः ॥ ततः कृतस्य मुखावलोकनकर्मणः साङ्गतासिद्ध्यर्थं इदं घृतपूर्णकांस्य-

पात्रं सहिरण्यं यथा नामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे ॥
इति दद्यात् ॥ ततो आचार्याय गां दत्वा ॥ कृतस्य मूल-
जनन शांतिकर्मणः सांगतासिध्यर्थं इदं गोनिष्क्रयभूतं द्रव्यं
रजतं चंद्रदैवतममुकगोत्रायाचार्याय तुभ्यमहं संप्रददे ॥
स्वस्ति ॥ कृतस्य० जननशां० सांग० यथासंख्याकान्ब्राह्मणा-
न्भोजयिष्ये ॥ ततो आवाहितदेवानामुत्तरपूजां कुर्यात् ॥
आवाहितदेवताभ्यो नमः इति मंत्रेण ततो आचार्याय प्रधा-
नपीठं दद्यात् ॥ कृ० मूलजननशां० इदं ग्रहपीठं मातृकापीठं
प्रधानपीठं सदक्षिणाकं आचार्याय तुभ्यमहं संप्रददे ॥ कृ०
शां० क० तन्मध्ये न्यूनातिरिक्तदोषपरिहारार्थं नानानाम गो-
त्रेभ्यो ब्राह्मणेभ्यः भूयसीं दक्षिणां विभज्य दातुमहमुत्सृजे ॥

विसर्जनम् ॥ ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वे महे उप-
प्रयन्तु मरुतः सुदानवऽइन्द्रप्रासुर्भवासचा ॥ यान्तु देवग-
णास्सर्वे पूजामादाय मामकीम् ॥ इष्टकामसमृद्ध्यर्थं पुनरा-
गमनाय च ॥ ॐ यज्ञयज्ञं गच्छ यज्ञपतिंगच्छ स्वां योनिं
गच्छ स्वाहा ॥ एषते यज्ञो यज्ञपते सहसूक्त वाकः सर्व-
वीरस्तञ्जुषस्वस्वाहा ॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर॥
यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन॥ प्रमादादिति पठेत् ॥
विष्णवे नमः ॥३॥

काशीस्थ सुप्रसिद्धमध्यमेश्वर वास्तव्येनाग्निहोत्रिणा
पं० श्रीवायुनन्दन मिश्रेण विरचितः मूलशान्तिप्रयोगः समाप्तः ॥

अथ मूलशान्ति सामग्री

-) केशर
चंदन
)। रोरी
)॥ नारा
-) अबीर
)। बुका
)॥ मेंहदी की बुकनी
)॥ हरदी की बुकनी
)। पीली सरसो
-)। सर्वोषधी
सप्तमृत्तिका
सप्तधान्य ऽ२॥
पंचपल्लव
पंचामृत
पंचगव्य
)॥ सिंदूर

=) मालाफूल
)॥ धूपवत्ती
दीपवत्ती २५
)॥ कपूर
पेड़ा ऽ।
बतासा ऽ=
=) ऋतुफल
पान ५०
सोपाड़ी १२।
नारियल ३
कलशा ताँबेका १
कलशा मट्टीका ५
कलशा सौ छेदका
शिकहर १
बाँसकी डलिया १
कंबलका टुकड़ा १

सप्तविंशतिकूपजलानि
तीर्थजल
बाँसका सुप२७बंधनका
खारूआ १। गज
मलमल १॥ गज
चौकी काठकी १
पीढ़ा २
गौ प्रत्यक्ष सवत्सा १
चावल ।ऽ८ सेर
यव ऽ॥।
तिल्ली ऽ१।
खाँड़ ऽ।-
पंचमेवा ऽ=
वरणी ८
धोती ८
अँगौछा ८

आसन ८
पंचपात्र ८
आचमनी ८
लोटा ८
कुशासन ८
यज्ञोपवीत १५
प्रधानको धोती दुपट्टा
गौको वस्त्र २
दोहनी काँसेकी १
कटोरा गौके संग १
काँसेकी थाली अग्निके साथ १
हवन का कटोरा १
चरुपात्र पीतलका १
सोने की सींग २
चाँदी का खुर ४
ताँबे की पीठ १

मोतीकी पूँछ १
घंटी २ घुघुरू १०
पूर्णपात्र पीतलका १
(१०० शतौषधी)
१ मयूरशिखा
२ विष्णुक्रांता
३ सहदेइया
४ गदहपूर्णा
५ सरपोखा
६ वाराहीकंद
७ घुघुची की पत्ती
८ सफेद मटकटैया
९ कड़ुई तूंबी
१० बहर
११ रसोत
१२ करेमू
१३ कोहड़ा

१४ नागरमोथा
१५ सफेद मंदार
१६ हैंसकी पत्ती
१७ रुद्रवन्ती
१८ असगंध
१९ मुसली
२० कोरैया
२१ इनारून
२२ चिचिड़ा
२३ शंखवल्ली
२४ घिकुआर
२५ सनई
२६ आकाश बौंर
२७ मेउड़ी
२८ देवदारू
२९ वट
३० शमी

३१ पाकर
३२ परास
३३ पीपर
३४ आम
३५ गूलर
३६ जामुन
३७ जलकुम्भी
३८ बेंत की जड़ (वा अमिलतास)
३९ नागकेसर
४० अर्जुनवृक्ष
४१ अशोक
४२ मौलश्री
४३ स्मंतक वृक्ष
४४ सखुआ
४५ तालका वृक्ष
४६ तेजपत्ता

४७ गुलाबका फूल
४८ सेवती गुलाब
४९ मुलेठी
५० सिरिस
५१ बेलका वृक्ष
५२ भटकटैया
५३ खिरैंटी
५४ सहदेइया
५५ भटकटैया
५६ पेठा
५७ गंगेरन
५८ जातीपुष्प
५९ बकुल पुष्प
६० केतकी पुष्प
६१ केला
६२ बड़ा निबुआ
६३ जयन्ती पुष्प

६४ यवाइन
६५ पुडरिका
६६ द्रोणपुष्प
६७ जलकुंभी
६८ श्रीपर्णी
६९ मदन
७० चंपा
७१ पद्मक
७२ कांचन पुष्प
७३ सिद्धेश्वरी
७४ वैर
७५ राजवृक्ष
७६ धवका फूल
७७ कुन्द
७८ मुचकुन्द
७९ गोजिह्वा
८० दारकंदुफर

८१ अनार
८२ बीजपुरी नीवू
८३ ब्राह्मी
८४ आमलकी
८५ भृङ्गराज
८६ अध: पुष्पी
८७ मत्स्याक्षी
८८ वाटरुषक
८९ तरंगिणी
९० गुरुची
९१ निशाह्वा
९२ शतावरी
९३ घकची
९४ कौवाठोंठी
९५ वघुरी
९६ तुलसी
९७ कुशा

९८ काशा
९९ ऊखकी जड़
१०० पीली सरसोंकी मूल

सर्वाभावे शतावरी वा सहदेवी

———

श्रीयुत परिडत वायुनन्दन जी मिश्र प्रणीत ।

ग्रहप्रयोग अर्थात् ग्रहशान्ति	(द्वितीय संस्करण)	॥।)
विवाह पद्धति टिप्पणी सहित	(तृतीय संस्करण)	≡)
उपनयन पद्धति टिप्पणी सहित		।)
श्राद्ध संग्रह अर्थात् अपूर्व श्राद्ध विवेक नवीन		१॥)
त्रिपिण्डीश्राद्धपद्धति		।)
गयाश्राद्धपद्धति		≢)
मूल शान्ति		।)
मूल शान्ति चक्र रंगीन		=)
वास्तु शान्ति		यंत्रस्थ

विविध पुस्तक प्राप्तिस्थान

मास्टर खेलाड़ीलाल एण्ड सन्स

संस्कृत बुकडिपो,

कचौड़ीगली,

बनारस सिटी ।

इति मूलशान्ति-पद्धतिः

श्रीसीताराम प्रेस, विश्वेश्वरगंज, काशी।